## उपाद्यमः स्वकरणे । (५६/२७२९)

शेषात् कर्तरि परस्मैपदे (१.३.७८/२१५९) प्राप्ते उपपूर्वात् [1]यमः स्वकरणे वर्तमानादात्मनेपदं भवति । पाणिग्रहणविशिष्टमिह स्वकरणं गृह्यते, न स्वकरणमात्रम् । भार्यामुपयच्छते[2] । स्वकरणे इति किम् ? देवदत्तो यज्ञदत्तस्य भार्यामुपयच्छति ॥

## ज्ञाश्रुस्मृदृशां सनः । (५७/२७३१)

ज्ञा श्रु स्मृ दृश् इत्येतेषां सन्नन्तानामात्मनेपदं भवति । तत्र जानातेः 'अपह्नवे ज्ञः' (१.३.४४/२७१७) [3]इति त्रिभिः सूत्रैरात्मनेपदं विहितम्, श्रुदृशोरपि 'समो गम्यृच्छि[04]' (१.३.२९/२६९९) इत्यत्र [5]विहितम् । [6]तस्मिन् विषये 'पूर्ववत् सनः' (१.३.६२/२७३४) [7]इत्येव सिद्धमात्मनेपदम् । ततोऽन्यत्रानेन विधीयते । [8]स्मरते पुनरप्राप्त एव विधानम् । धर्मं जिज्ञासते । गुरुं शुश्रूषते । नष्टं सुस्मूर्षते । नृपं दिदृक्षते । सनः इति किम् ? जानाति, शृणोति, [9]स्मरति, पश्यति ॥

## नानोर्ज्ञः । (५८/२७३२)

पूर्वेण योगेन प्राप्तमात्मनेपदं [10]प्रतिषिध्यते । अनुपूर्वाज् जानातेः सन्नन्तादात्मनेपदं न भवति । तथा च सति सकर्मकस्यै[11]वायं प्रतिषेधः सम्पद्यते[12] । पुत्रमनुजिज्ञासति[13] । अनोः इति किम् ? धर्मं जिज्ञासते[14] ॥

## प्रत्याङ्भ्यां श्रुवः । (५९/२७३३)

प्रति आङ इत्येवंपूर्वाच्छृणोतेः सन्नन्तादात्मनेपदं न भवति । प्रतिशुश्रूषति । आशुश्रूषति[15] । [16]उपसर्गग्रहणं चेदं, तस्मादिह [17]प्रतिषेधो न भवति, [18]देवदत्तं प्रति शुश्रूषते ॥

## शदेः शितः । (६०/२३६२)

'शद्लृ शातने' (धा. पा. १८५५) परस्मैपदी, तस्मादात्मनेपदं विधीयते । शदिर्यः शित्, शिद्भावी,: शितो वा सम्बन्धी तस्मादात्मनेपदं भवति । शीयते, शीयेते, शीयन्ते । शितः इति किम् ? [19]अशत्स्यत् । [20]शत्स्यति । [21]शिशत्सति ॥

---

1. यमेः फ. 2. कन्यामुपयच्छते इत्यधिकम् अ. क. ड. फ. 3. इत्यादि ड. 4. पृच्छि इत्यधिकम् क. 5. तत्रैव दृशेरपि संपूर्वात् दृशेश्च इति वक्तव्यं इति वर्तते इत्यधिकम् फ. 6. तद्विषये अ. 7. एव नास्ति फ. 8. स्मृतेः ब. 9. स्मरति नास्ति ह, पश्यति नास्ति फ. 10. तत् इत्यधिकम् फ. 11. एव नास्ति फ. 12. नोत्तरेण विधीयमानस्याकर्मकस्य पूर्ववत्सनः इत्यस्य इत्यधिकम् क. 13. शिष्यमनुजिज्ञासति इत्यधिकम् क, भार्यामनुजिज्ञासति इत्यधिकम् अ. ह. 14. सकर्मकस्य प्रतिषेधादिह न भवति सर्पिष्यनुजिज्ञासते इति इत्यधिकम् क. 15. प्रत्याङ्भ्याम् इति किम् अनुशुश्रूषते इत्यधिकम् क. 16. उपसर्गे क. 17. प्रतिषेधो नास्ति फ. 18. देवदत्तो यज्ञदत्तं प्रति शुश्रूषते क. ह. 19. लुङि इत्यधिकम् क, अशत्स्यत् नास्ति फ. 20. लृटि इत्यधिकम् क. 21. सनि इत्यधिकम् क.